# विभक्तिः

१८ – २३.०४.२०१६

व्योम-संस्कृत-पाठशाला
www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- पञ्चमीविभक्तिः
  - अपादानम् १ – विभागस्य अवधिः।
  - वृक्षात् पतति, ग्रामात् आगच्छति, शालायाः आनयति।
  - अपादानम् २ – भयस्य कारणम्।
  - व्याघ्रात् भीतः, परीक्षायाः भयम्, जनकात् बिभेति, दुष्टात् त्रस्यति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- पञ्चमीविभक्तिरूपाणि
  - बालात् बालाभ्याम् बालेभ्यः
  - मित्रात् मित्राभ्याम् मित्रेभ्यः
  - बालिकायाः बालिकाभ्याम् बालिकाभ्यः
  - नार्याः नारीभ्याम् नारीभ्यः

# अपादानाम् २ - उदाहरणानि

- आरक्षकाः चोरेभ्यः अस्मान् रक्षन्ति।
- श्रीरामः राक्षसेभ्यः महर्षिगणं रक्षितवान्।
- सः बालं सिंहात् रक्षति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अपादानम्

- विभागस्य अवधिः – Point of separation
- ध्रुवमपायेऽपादानम्।
- अपादाने पञ्चमी।
- पतति, गच्छति, आगच्छति, आनयति इत्यादीनां धातूनां विषये 'कस्मात्?' / 'कुतः'? इति प्रश्नस्य उत्तरम् अपादानं भवति।

# अपादानम् - २

- भयस्य कारणम् – Source of fear
- 'भीत्रार्थानां भयहेतुः'
- भयम्, भीतिः, भीतः, भीः, बिभेति, त्रस्यति, इत्यादीनां प्रयोगे भयस्य यत् मूलम् तस्मात् पञ्चमीविभक्तिः ।
- रक्षति, पाति, त्रायते इत्यादीनामपि प्रयोगे भयस्य यत् मूलं तस्मात् पञ्चमी ।

# अभ्यासः - १

- आरक्षकाः – चोराः
- वैद्यः – रोगाः
- राजा – समस्याः
- वृष्टिः – अवग्रहः
- छत्रम् - आतपः
- देवः - संसारः
- पादरक्षा – कण्टकानि
- वस्त्राणि – शैत्यम्
- ज्ञानम् – अविवेकिता
- सन्मित्रम् – पापम्
- नाविकः – प्रवाहः
- गुरुः – अज्ञानम्

# अभ्यासः - २

कस्मात् भयम्? / कस्मात् रक्षति?

स्वीयवाक्यानि वदत।

# अपादानम् ३ - उदाहरणानि

- गङ्गा हिमालयात् प्रभवति।
- कावेरी उदकमण्डलात् प्रभवति।

# अभ्यासः - ३

# कुतः प्रभवति?

- ब्रह्मपुत्रः – हिमालयः
- सिन्धुः – मानससरोवरः
- यमुना - यमुनोत्रिहिमशैलः
- कृष्णा – महाबलेश्वरः
- नर्मदा – अमरकण्टकम्
- गोदावरी - ब्रह्मगिरिपर्वतः
- तुङ्गा – वराहपर्वतः
- महानदी – सिहवापर्वतः
- ताम्रपर्णी – अगस्त्यकूटः
- भद्रा – गङ्गामूलम्
- शरावती – अम्बुतीर्थम्
- तपती - सातपुरपर्वतः

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# रटनम्